God Ganesha All PDF available at only : https://ganeshchalisapdf.com/

# Ganesh Atharvashirsha

## ॥ शान्ति पाठ ॥

ॐ भद्रं कर्णेभिः शृणुयाम देवा ।
भद्रं पश्येमाक्षभिर्यजत्राः ॥
स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिः ।
व्यशेम देवहितं यदायुः ॥

ॐ स्वस्ति न इन्द्रो वृद्धश्रवाः ।
स्वस्ति नः पूषा विश्ववेदाः ॥
स्वस्तिनस्ताक्ष्र्यो अरिष्टनेमिः ।
स्वस्ति नो बृहस्पतिर्दधातु ॥
ॐ तन्मामवतु
तद् वक्तारमवतु
अवतु माम्
अवतु वक्तारम्
ॐ शांतिः । शांतिः ॥ शांतिः॥।

## ॥ उपनिषत्॥

हरिः ॐ नमस्ते गणपतये ॥

त्वमेव प्रत्यक्षं तत्त्वमसि ॥ त्वमेव केवलं कर्ताऽसि ॥
त्वमेव केवलं धर्ताऽसि ॥ त्वमेव केवलं हर्ताऽसि ॥
त्वमेव सर्वं खल्विदं ब्रह्मासि ॥

त्वं साक्षादात्माऽसि नित्यम्॥ १॥

## ॥ स्वरूप तत्त्व ॥

ऋतं वच्मि (वदिष्यामि) ॥ सत्यं वच्मि (वदिष्यामि) ॥ २॥
अव त्वं माम्॥ अव वक्तारम्॥ अव श्रोतारम्॥
अव दातारम्॥ अव धातारम्॥
अवानूचानमव शिष्यम्॥

अव पश्चात्तात्॥ अव पुरस्तात्॥

अवोत्तरात्तात्॥ अव दक्षिणात्तात्॥
अव चोर्ध्वात्तात्॥ अवाधरात्तात्॥

God Ganesha All PDF available at only : https://ganeshchalisapdf.com/

सर्वतो मां पाहि पाहि समंतात्॥ ३॥
त्वं वाङ्मयस्त्वं चिन्मयः ॥

त्वमानंदमयस्त्वं ब्रह्ममयः ॥

त्वं सच्चिदानंदाद्वितीयोऽसि ॥
त्वं प्रत्यक्षं ब्रह्मासि ॥

त्वं ज्ञानमयो विज्ञानमयोऽसि ॥ ४॥
सर्वं जगदिदं त्वत्तो जायते ॥
सर्वं जगदिदं त्वत्तस्तिष्ठति ॥

सर्वं जगदिदं त्वयि लयमेष्यति ॥
सर्वं जगदिदं त्वयि प्रत्येति ॥

त्वं भूमिरापोऽनलोऽनिलो नभः ॥
त्वं चत्वारि वाक्पदानि ॥ ५॥

त्वं गुणत्रयातीतः त्वमवस्थात्रयातीतः ॥

त्वं देहत्रयातीतः ॥ त्वं कालत्रयातीतः ॥
त्वं मूलाधारस्थितोऽसि नित्यम्॥
त्वं शक्तित्रयात्मकः ॥

त्वां योगिनो ध्यायंति नित्यम्॥

त्वं ब्रह्मा त्वं विष्णुस्त्वं रुद्रस्त्वं
इन्द्रस्त्वं अग्निस्त्वं वायुस्त्वं सूर्यस्त्वं चंद्रमास्त्वं
ब्रह्मभूर्भुवःस्वरोम्॥ ६॥

## ॥ गणेश मंत्र ॥

गणादिं पूर्वमुच्चार्य वर्णादिं तदनंतरम्॥

अनुस्वारः परतरः ॥ अर्धेन्दुलसितम्॥ तारेण ऋद्धम्॥
एतत्तव मनुस्वरूपम्॥ गकारः पूर्वरूपम्॥

अकारो मध्यमरूपम्॥ अनुस्वारश्चान्त्यरूपम्॥
बिन्दुरुत्तररूपम्॥ नादः संधानम्॥
संहितासंधिः ॥ सैषा गणेशविद्या ॥

गणकऋषिः ॥ निचृद्गायत्रीच्छंदः ॥

ganeshchalisapdf.com

God Ganesha All PDF available at only : https://ganeshchalisapdf.com/

गणपतिर्देवता ॥ ॐ गं गणपतये नमः ॥ ७॥

## ॥ गणेश गायत्री ॥

एकदंताय विद्महे । वक्रतुण्डाय धीमहि ॥
तन्नो दंतिः प्रचोदयात्॥ ८॥

## ॥ गणेश रूप ॥

एकदंतं चतुर्हस्तं पाशमंकुशधारिणम्॥

रदं च वरदं हस्तैर्बिभ्राणं मूषकध्वजम्॥
रक्तं लंबोदरं शूर्पकर्णकं रक्तवाससम्॥

रक्तगंधानुलिप्तांगं रक्तपुष्पैः सुपूजितम्॥

भक्तानुकंपिनं देवं जगत्कारणमच्युतम्॥

आविर्भूतं च सृष्ट्यादौ प्रकृतेः पुरुषात्परम्॥

एवं ध्यायति यो नित्यं स योगी योगिनां वरः ॥ ९॥

## ॥ अष्ट नाम गणपति ॥

नमो व्रातपतये । नमो गणपतये । नमः प्रमथपतये ।
नमस्तेऽस्तु लंबोदरायैकदंताय ।
विघ्ननाशिने शिवसुताय । श्रीवरदमूर्तये नमो नमः ॥ १०॥

## ॥ फलश्रुति ॥

एतदथर्वशीर्षं योऽधीते ॥ स ब्रह्मभूयाय कल्पते ॥
स सर्वतः सुखमेधते ॥ स सर्व विघ्नैर्नबाध्यते ॥
स पंचमहापापात्प्रमुच्यते ॥

सायमधीयानो दिवसकृतं पापं नाशयति ॥
प्रातरधीयानो रात्रिकृतं पापं नाशयति ॥

सायंप्रातः प्रयुंजानो अपापो भवति ॥
सर्वत्राधीयानोऽपविघ्नो भवति ॥
धर्मार्थकाममोक्षं च विंदति ॥

ganeshchalisapdf.com

God Ganesha All PDF available at only : https://ganeshchalisapdf.com/

इदमथर्वशीर्षमशिष्याय न देयम्॥
यो यदि मोहाद्दास्यति स पापीयान्भवति
सहस्रावर्तनात्यं यं काममधीते
तं तमनेन साधयेत्॥ ११॥
अनेन गणपतिमभिषिंचति स वाग्मी भवति ॥
चतुर्थ्यामनश्नन्जपति स विद्यावान्भवति ।
स यशोवान्भवति ॥
इत्यथर्वणवाक्यम्॥ ब्रह्माद्यावरणं विद्यात्
न बिभेति कदाचनेति ॥ १२॥

यो दूर्वांकुरैर्यजति स वैश्रवणोपमो भवति ॥
यो लाजैर्यजति स यशोवान्भवति ॥
स मेधावान्भवति ॥

यो मोदकसहस्रेण यजति
स वाञ्छितफलमवाप्नोति ॥

यः साज्यसमिद्भिर्यजति
स सर्वं लभते स सर्वं लभते ॥ १३॥
अष्टौ ब्राह्मणान्सम्यग्ग्राहयित्वा
सूर्यवर्चस्वी भवति ॥
सूर्यग्रहे महानद्यां प्रतिमासंनिधौ
वा जप्त्वा सिद्धमंत्रो भवति ॥

महाविघ्नात्प्रमुच्यते ॥ महादोषात्प्रमुच्यते ॥
महापापात्प्रमुच्यते ॥

स सर्वविद्भवति स सर्वविद्भवति ॥
य एवं वेद इत्युपनिषत्॥ १४॥

## ॥ शान्ति मंत्र ॥

ॐ सहनाववतु ॥ सहनौभुनक्तु ॥
सह वीर्यं करवावहै ॥

तेजस्विनावधीतमस्तु मा विद्विषावहै ॥
ॐ भद्रं कर्णेभिः शृणुयाम देवा ।
भद्रं पश्येमाक्षभिर्यजत्राः ॥
स्थिरैरंगैस्तुष्टुवांसस्तनूभिः ।
व्यशेम देवहितं यदायुः ॥

ॐ स्वस्ति न इन्द्रो वृद्धश्रवाः ।
स्वस्ति नः पूषा विश्ववेदाः ॥
स्वस्तिनस्तार्क्ष्यो अरिष्टनेमिः ।

**God Ganesha All PDF available at only : https://ganeshchalisapdf.com/**

स्वस्ति नो बृहस्पतिर्दधातु ॥

ॐ शांतिः । शांतिः ॥ शांतिः ॥।
॥ इति श्रीगणपत्यथर्वशीर्षं समाप्तम्॥

ganeshchalisapdf.com